# NCERT Solutions Class 7 Sanskrit (Deepakam)

## Chapter 10 दशमः कः

**१. कोष्ठकात् समीचीनम् उत्तरं चित्वा लिखन्तु ।**

**(कोष्ठक से सही उत्तर चुनकर लिखिए | )**

(क) कति बालकाः स्नातुं गताः ? (पञ्च, द्वादश, दश)
(ख) कतमः बालकः नद्यां मग्नः इति निश्चयम् अकुर्वन् ? (प्रथमः, दशमः, पञ्चमः)
(ग) दशमः कः आसीत्? (नायकः, पथिकः, नदी)
(घ) कः सम्यक् रूपेण बालकान् गणितवान्? (नायकः, पथिकः, बालकः)
(ङ) बालकाः कां तीर्त्वा पारं गताः ? (पुष्करिणीम्, समुद्रम्, नदीम् )

**उत्तरः** (क) दश
(ख) दशमः
(ग) नायकः
(घ) पथिकः
(ङ) नदीम्

**२. पाठस्य आधारेण एकवाक्येन प्रश्नानाम् उत्तराणि लिखन्तु ।**

**(पाठ के आधार पर प्रश्नों के उत्तर एक वाक्य में दीजिए।)**

(क) दश बालकाः किमर्थं नदीम् अगच्छन्?
(ख) नायकः किम् अपृच्छत्?
(ग) बालकाः स्नानाय कुत्र अगच्छन् ?
(घ) बालकाः किं निश्चयम् अकुर्वन् ?
(ङ) बालकाः कथं गृहम् अगच्छन्?

**उत्तरः** (क) दश बालकाः स्नानाय नदीम् अगच्छन्|
(ख) नायक: अपृच्छत् – अयि बालकाः ! युष्माकं दुःखस्य कारणं किम्?
(ग) बालकाः स्नानाय नदीम् अगच्छन्|

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(घ) बालकाः निश्चयम् अकुर्वन् यत् दशमः नद्यां मग्नः ।

(ङ) बालकाः मिलित्वा आनन्देन गृहम् अगच्छन्।

### ३. पट्टिकातः उचितं विशेषणपदं योजयित्वा वाक्यानि रचयन्तु।

(पट्टिका से उचित विशेषण पद को जोड़कर वाक्य बनाइए ।)




प्रथमा  द्वितीया  तृतीया  चतुर्थी  पञ्चमी

(क) करे ................................ अङ्गुलिः भवति तर्जनी।

(ख) अनामिका ................................ अङ्गुलिः भवति।

(ग) करे ................................ अङ्गुलिः भवति अङ्गुष्ठः।

(घ) कनिष्ठिका ................................ अङ्गुलिः भवति।

(ङ) करे ................................ अङ्गुलिः भवति मध्यमा।

**उत्तरः** (क) द्वितीया

(ख) चतुर्थी

(ग) प्रथमा

(घ) पञ्चमी

(ङ) तृतीया

### ४. पट्टिकां दृष्ट्वा प्रश्नानाम् उत्तराणि लिखन्तु

(पट्टिका को देखकर प्रश्नों के उत्तर लिखिए।)

**सप्ताहः**

प्रथमः दिवसः – रविवासरः
द्वितीयः दिवसः – सोमवासरः
तृतीयः दिवसः – मङ्गलवासरः
चतुर्थः दिवसः – बुधवासरः
पञ्चमः दिवसः – गुरुवासरः
षष्ठः दिवसः – शुक्रवासरः
सप्तमः दिवसः – शनिवासरः



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(क) सप्ताहस्य प्रथमः दिवसः कः ? .................**

**उत्तरः** रविवासरः

**(ख) सप्ताहस्य कतमः दिवसः रविवासरः अस्ति ? ................**

**उत्तरः** प्रथमः

**(ग) सप्ताहस्य षष्ठः दिवसः कः ? .........**

**उत्तरः** शुक्रवासरः

**(घ) सप्ताहस्य कतमः दिवसः शनिवासरः अस्ति ? ..........**

**उत्तरः** सप्तमः

**(ङ) सप्ताहस्य अन्तिमः दिवसः कः अस्ति ? ...........**

**उत्तरः** शनिवासरः

**५. वाटिकां दृष्ट्वा प्रश्नानाम् उत्तराणि लिखन्तु ।**

**(पट्टिका को देखकर प्रश्नों के उत्तर लिखिए।)**




(क) मासेषु पञ्चमः मासः कः ?

(ख) मार्गशीर्षः कतमः मासः अस्ति ?

(ग) मासेषु दशमः मासः कः ?

(घ) कार्तिकः कतमः मासः अस्ति ?

(ङ) मासेषु अन्तिमः मासः कः ?

**उत्तरः** (क) श्रावणः

(ख) नवमः

(ग) पौषः

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(घ) अष्टमः

(ङ) फाल्गुनः

## ६. मञ्जूषां पश्यन्तु, उत्तरं लिखन्तु –

**आङ्ग्लमासाः**

**(मंजूषा देखिए और उत्तर लिखिए ।)**




(क) आङ्ग्लमासेषु दशमः मासः .................

(ख) फरवरीमासः ................. मासः अस्ति ।

(ग) आङ्ग्लमासेषु अष्टमः मासः .................

(घ) सितम्बरमास: ........ मासः अस्ति ।

(ङ) आङ्ग्लमासेषु अन्तिमः मासः ...........।

**उत्तरः** (क) अक्तूबरमासः

(ख) द्वितीयः

(ग) अगस्तमासः

(ङ) दिसम्बरमास:

(घ) नवमः

## ७. अधोलिखिते गद्यांशे अङ्कानां स्थाने संख्यावाचकशब्दान् लिखन्तु ।

**(निम्नलिखित गद्यांश में अंकों के स्थान पर संख्यावाचक शब्द लिखिए।)**

**यथा- (१) पाठशाला – एका पाठशाला।**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

यथा – ""(१) पाठशाला"" – एका पाठशाला

.................... (१) पाठशाला अस्ति। तत्र .................... (३) अध्यापकाः सन्ति। साहित्यकक्षायां .................... (२०) छात्राः सन्ति। एकस्मिन् दिने .................... (१) निरीक्षकः आगतवान्। तस्मिन् दिने साहित्यकक्षायां .................... (१५) छात्राः उपस्थिताः। .................... (५) अनुपस्थिताः। निरीक्षकः .................... (१०) शब्दान् लेखितुम् उक्तवान्। .................... (२) छात्रौ .................... (७) शब्दान् सम्यक् लिखितवन्तौ। .................... (१) छात्रः सर्वान् अपि .................... (१०) शब्दान् सम्यक् लिखितवान्। अवशिष्टाः .................... (१२) छात्राः .................... (९) शब्दान् सम्यक् लिखितवन्तः।

## उत्तरः

.........एका......... (१) पाठशाला अस्ति। तत्र ......त्रयः.........(३) अध्यापकाः सन्ति। साहित्यकक्षायां ......विंशति.........(२०) छात्राः सन्ति। एकस्मिन दिने .....एकः.......(१) निरीक्षकः आगतवान्। तस्मिन् दिने साहित्यकक्षायां ......पञ्चदश......(१५) छात्रा उपस्थिताः। .........पञ्च.........(५) अनुपस्थिताः। निरीक्षकः .........दश.........(१०) शब्दान् लेखितुम् उक्तवान्। .........द्वौ.........(२) छात्रौ .......सप्त.........(७) शब्दान् सम्यक् लिखितवन्तौ। .......एकः.........(१) छात्रः सर्वान् अपि .........दश......... (१०) शब्दान् सम्यक् लिखितवान्। अवशिष्टाः ......द्वादश......(12) छात्राः ......नव......(९) शब्दान् सम्यक् लिखितवन्तः।

## प्रश्न 1. अधोलिखित- अङ्कानां स्थाने संख्यावाचक- पदैः रिक्तस्थानानि पूरयत। (नीचे दिए गए अंकों के स्थान पर संख्यावाचक शब्दों से रिक्तस्थानों की पूर्ति कीजिए।)

*पर संख्यावाचक शब्दों से रिक्तस्थानों की पूर्ति कीजिए।)*

सूर्यः ..................(१)। सूर्यस्य ..................(२) गती। जगतः ..................(३) स्थितयः सृष्टिः, विकासः प्रलयश्च। कृतयुगं, त्रेतायुगं, द्वापरयुगं कलियुगञ्चेति ..................(४) युगानि। भूतं वर्तमानं भविष्यद् इति ..................(३) कालभेदाः। एकस्मिन् वर्षे ..................(६) ऋतवः भवन्ति। वर्षे ..................(१२) मासाः भवन्ति। .................. (१४) मन्वन्तराणां समूहः कल्पः। ब्राह्मणः आयुः .................. (१००) वर्षाणि।

## उत्तरः

सूर्यः ....एकः......(१)। सूर्यस्य .....द्वे......(२) गती। जगतः .....तिस्रः......(३) स्थितयः सृष्टिः, विकासः प्रलयश्च। कृतयुगं, त्रेतायुगं द्वापरयुगं कलियुगञ्चेति ...चत्वारि...(४) युगानि। भूतं वर्तमानं भविष्यद् इति ...त्रयः...(३) कालभेदाः। एकस्मिन् वर्षे ...षड्...(६) ऋतवः भवन्ति। वर्षे ....द्वादश.....(१२) मासाः भवन्ति। ...चतुर्दश.... (१४) मन्वन्तराणां समूहः कल्पः। ब्राह्मणः आयुः ...शतम्... (१००) वर्षाणि।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**प्रश्न 2. रिक्तस्थानपूर्तिः उचितसंख्यावाचकपदेन क्रियताम् ।**
**(रिक्त स्थानों की पूर्तिसंख्यावाचक पदों से कीजिए ।)**

(क) धर्म-अर्थ-काममोक्षाः इति ......... (४) पुरुषार्थाः सन्ति ।
(ख) हस्ते (५) .......... अङ्गुल्यः भवन्ति।
(ग) ईश्वरः ......... (१) अस्ति ।
(घ) .......... (३). पत्राणि पतन्ति ।
(ङ) सप्ताहे ......... (७) दिनानि भवन्ति ।
(च) मासे .......... (२) पक्षौ भवतः शुक्लपक्षः कृष्णपक्षः च।
(छ) (१) ......... वर्षे ........ (१२) मासः भवन्ति ।
(ज) धातवः ........ (८) भवन्ति ।
(झ) वेदाः ........ (४) सन्ति ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च ।

**उत्तरः** (क) चत्वारः
(ख) पञ्च
(ग) एक:
(घ) त्रीणि
(ङ) सप्त
(च) द्वौ
(छ) एकस्मिन् ; द्वादश
(झ) चत्वारः
(ज) अष्ट

**प्रश्न 3. अधोलिखितानि क्रमानुसारेण लिखन्तु ।**
**(निम्नलिखित को क्रमानुसार लिखिए ।)**

**यथा- मासः, पक्षः, दिवसः, वर्षम् ।**
- **दिवसः, पक्षः, मासः, वर्षम्।**

(क) कलियुगम्, द्वापरम्, त्रेता, सतयुगम्।
(ख) चतुर्थी, प्रतिपदा, त्रयोदशी, अष्टमी।
(ग) वर्षा, वसन्तः, ग्रीष्मः, हेमन्तः ।
(घ) आषाढः, चैत्रः, ज्येष्ठः, वैशाखः ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**उत्तरः** (क) सतयुगम्, त्रेता, द्वापर, कलियुगम्।
(ख) प्रतिपदा, चतुर्थी, अष्टमी, त्रयोदशी।
(ग) वसन्तः, ग्रीष्मः, वर्षा, हेमन्तः ।
(घ) चैत्रः, वैशाखः, ज्येष्ठः, आषाढः।

**प्रश्न 4. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**
**(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए।)**

(क) एकदा दश बालकाः स्नानाय नदीम् अगच्छन्। ते नदीजले चिरं स्नानम् अकुर्वन् । ततः ते तीर्त्वा पारं गताः । तदा तेषां नायकः अपृच्छत्— अपि सर्वे बालकाः नदीम् उत्तीर्णा : ? तदा कश्चित् बालकः सर्वान् पङ्क्तौ स्थापयित्वा अगणयत् एकः द्वौ, त्रयः, चत्वारः, पञ्च, षट्, सप्त, अष्ट, नव इति । सः आत्मानं न अगणयत् । अतः सः अवदत् – अरे वयं नव एव स्मः भोः! दशमः नास्ति । अपरः अपि बालक : पुनः आत्मानं त्यक्त्वा अन्यान् बालकान् अगणयत् । तदा अपि नव एव आसन्। अतः ते निश्चयम् अकुर्वन् यत् दशमः नद्यां मग्नः । ते विषण्णाः तूष्णीम् अतिष्ठन् ।

**I. एकपदेन उत्तरत।**

**(i) कति बालकाः नदीम् अगच्छन् ?**
**उत्तरः** दश

**(ii) बालकाः कीदृशा: अतिष्ठन् ?**
**उत्तरः** विषण्णाः

**(iii) एकः बालकः कंम न अगणयत् ?**
**उत्तरः** आत्मानं

**II. पूर्णवाक्येन उत्तरत ।**

**(i) बालकानां नायकः किम् अपृच्छत् ?**
**उत्तरः** बालकानां नायकः: अपृच्छत्-अपि सर्वे बालकाः नदीम् उत्तीर्णा : ?

**(ii) बालकाः किमर्थम् अगच्छन् ?**
**उत्तरः** बालकाः स्नानाय नदीम् अगच्छन्।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(iii) बालकाः किं कृत्वा पारं गताः ?**

**उत्तरः** बालकाः तीर्त्वा पारं गताः ।

**(iv) अपरः बालकः किम् अकरोत् ?**

**उत्तरः** अपरः बालकः अपि पुनः आत्मानं त्यक्त्वा अन्यान् बालकान् अगणयत्।

**III. भाषिककार्यम्।**

**(i) 'सर्वे बालकाः' अत्र विशेषणपदं किम् ?**

(क) सर्वे

(ख) बालकाः

(ग) सर्वे बालकाः

**उत्तरः** (क) सर्वे

**(ii) कश्चित् बालकः सर्वान् ........ स्थापयित्वा अगणयत्। रिक्तस्थानपूर्तिः क्रियताम् ।**

(क) पंक्तिः

(ख) पंक्तौ

(ग) पंक्तेः

**उत्तरः** (ख) पंक्तौ

**(iii) 'अतः सः अवदत् ।' अत्र क्रियापदं किम् ?**

(क) अवदत्

(ख) सः

(ग) अतः

**उत्तरः** (क) अवदत्

**(iv) 'ते विषण्णाः अभवन् ।' अत्र कर्तृपदं किम् ?**

(क) अभवत्

(ख) ते

(ग) विषण्णाः

**उत्तरः** (ख) ते

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ख) तदा कश्चित् पथिकः तत्र आगच्छत्। सः तान् बालकान् दुःखितान् दृष्ट्वा अपृच्छत् – अयि बालकाः ! युष्माकं दुःखस्य कारणं किम्? बालकानां नायकः अकथयत् 'वयं दश बालकाः स्नातुम् आगताः । इदानीं नव एव स्मः । एकः नद्यां मग्नः' इति ।

पथिक : तान् अगणयत्। तत्र दश बालकाः तु आसन्। सः नायकम् आदिशत् त्वं बालकान् गणय । सः नव बालकान्
एव अगणयत्। तदा पथिकः अवदत् – दशमः त्वम् असि इति । तत् श्रुत्वा सर्वे प्रहृष्टाः भूत्वा अकथयन् – दशमः प्राप्तः दशमः प्राप्तः इति । ततः सर्वे मिलित्वा आनन्देन गृहम् अगच्छन्।

**I. एकपदेन उत्तरत।**

**(i) तत्र कः आगच्छत् ?**
**उत्तरः** पथिकः

**(ii) पथिकः कान् अगणयत् ?**
**उत्तरः** बालकान्

**(iii) बालकाः कति आसन् ?**
**उत्तरः** दश

**(iv) पथिकः कम् आदिशत् ?**
**उत्तरः** नायकम्

**II. पूर्णवाक्येन उत्तरत।**

**(i) पथिकः किम् अपृच्छत् ?**
**उत्तरः** पथिकः अपृच्छत्- अयि बालकाः ! युष्माकं दुःखस्य कारणं किम् ?

**(ii) पथिकः किम् अवदत् ?**
**उत्तरः** पथिकः किम् अवदत् – 'दशमः त्वम् असि ।'

**(iii) किं श्रुत्वा बालकाः प्रसन्नाः अभवन्?**
**उत्तरः** 'दशमः त्वम् असि ।' इति श्रुत्वा बालकाः प्रसन्नाः अभवन्।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(iv) नायकः किम् अकथयत् ?**

**उत्तरः** नायकः अकथयत् 'वयं दश बालकाः स्नातुम् आगताः । इदानीं नव एव स्मः एकः नद्यांमग्नः' इति ।

**III. भाषिककार्यम् ।**

**(i) 'तदा कश्चित् पथिकः तत्र आगच्छत् । ' अस्मिन् वाक्ये अव्ययपदानि प्रयुक्तानि –**

(क) त्रीणि

(ख) चत्वारि

(ग) पञ्च

**उत्तरः** (क) त्रीणि

**(ii) 'आकर्ण्य' इति पदस्य समानार्थकपदं किं प्रयुक्तम् ?**

(क) सर्वे

(ख) प्रहृष्टाः

(ग) श्रुत्वा

**उत्तरः** (ग) श्रुत्वा

**(iii) 'त्वं बालकान् गणय ।' अत्र कर्तृपदं किम् ?**

(क) बालकान्

(ख) त्वम्

(ग) गणय

**उत्तरः** (ख) त्वम्

**(iv) 'सः बालकान् अगणयत्।' अत्र क्रियापदं किम् आगतम्?**

(क) सः

(ख) बालकान्

(ग) अगणयत्

**उत्तरः** (ग) अगणयत्

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**प्रश्न 5. विलोमपदानि मेलयत।**

**(विलोम पदों को मिलाइए।)**

| 'क' | 'ख' |
| --- | --- |
| (क) विषण्णाः | (i) शीघ्रम् |
| (ख) चिरम् | (ii) तदानीम् |
| (ग) निश्चयम् | (iii) सन्ति |
| (घ) अगच्छन् | (iv) प्रसन्नाः |
| (ङ) इदानीम् | (v) आगच्छन् |
| (च) आसन् | (vi) अनिश्चयम् |

**उत्तरः** (क) – (iv)

(ख) – (i)

(ग) – (vi)

(घ) – (v)

(ङ) – (ii)

(च) – (iii)

**प्रश्न 6.पर्यायपदानि मेलयत ।**

**(पर्याय पदों को मिलाइए।)**

| 'क' | 'ख' |
| --- | --- |
| (क) पारं गताः | (i) दुःखिनः |
| (ख) विषण्णाः | (ii) अवलोक्य |
| (ग) त्यक्त्वा | (iii) प्रसन्नाः |
| (घ) दृष्ट्वा | (iv) उत्तीर्णाः |
| (ङ) श्रुत्वा | (v) स्वागतम् |
| (च) प्रहृष्टाः | (vi) अन्यः |
| (छ) अपरः | (vii) आकर्ण्य |
| (ज) अभिनन्दनम् | (viii) परित्यज्य |

**उत्तरः** (क) – (iv)

(ख) – (i)

(ग) – (viii)

(घ) – (ii)

(ङ) – (vii)

(च) – (iii)

(छ) – (vi)

(ज) – (v)

Get More Learning Materials Here : CLICK HERE www.studentbro.in